CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीगणेशायनमः ॐ ब्रोधच्छात्रमहावटद्रुमतरे यो गामनस्कं समं भास्यन्तं व
बुभुत्सुभिः प्रतिदिशं प्रोद्वीज्यमानाननं मुद्रां तर्कमयीं दधानममलं कर्पूरगौरं शि
वं हृद्यंतःकलये स्फुरंतमनिशं श्रीदक्षिणामूर्त्तिकम् १ विश्वं दर्पणदृश्यमानन
गरीतुल्यं निजांतर्गतं पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया यःसा
क्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं तस्मै श्रीगुरुमूर्त्तये नम इदं श्रीदक्षिणा
मूर्त्तये २ बीजस्यांतरिवांकुरो जगदिदं प्राङ्निर्विकल्पं पुनर्मायाकल्पितदेश
कालकलनावैचित्र्यचित्रीकृतं मायावीव विजृंभयत्यपि महायोगीव यः स्वेच्छया त
स्मै श्रीगुरुमूर्त्तये नम इदं श्रीदक्षिणामूर्त्तये ३ यस्यैव स्फुरणं सदात्मकमस
© Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham
त्कल्पार्थकं भासते साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् यत्साक्षा

बाल्यादिस्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि व्यावृत्तास्वनुवर्त्तमानमह
मित्यंतःस्फुरंतंसदा स्वात्मानंप्रकटीकरोति भजतां यो भद्रयामुद्रया तस्मैश्री
गुरुमूर्त्तयेनमइदंश्रीदक्षिणामूर्त्तये ८ विश्वंपश्यतिकार्यकारणतया स्व
स्वामिसंबंधतः शिष्याचार्यतया तथैवपितृपुत्राद्यात्मना भेदतः स्वप्ने जाग्रति
वा य एष पुरुषो मायापरिभ्रामितस्तस्मैश्रीगुरुमूर्त्तयेनमइदंश्रीदक्षिणा
मूर्त्तये ९ भूरंभांस्यनलोनिलोंबरमहर्नाथो हिमांशुःपुमानित्याभाति
चराचरात्मकमिदं यस्यैवमूर्त्यष्टकं नान्यत्किंचनविद्यते विमृशतां यस्मात्पर
स्माद्विभोस्तस्मैश्रीगुरुमूर्त्तयेनमइदंश्रीदक्षिणामूर्त्तये १० सर्वात्मत्वमि
तिस्फुटीकृतमिदंयस्मादमुष्मिंस्तवे तेनास्य श्रवणात्तदर्थमननाद्ध्याना

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्करणाद्भवेन्नपुनरावृत्तिर्भवांभोनिधौ तस्मैश्रीगुरुमूर्त्तयेनमइदंश्रीद
क्षिणामूर्त्तये ४ नानाछिद्रघटोदरस्थितमहादीपप्रभाभास्वरं ज्ञानंयस्य
तुचक्षुरादिकरणद्वाराबहिःस्पंदते जानामीतितमेवभांतमनुभात्येतत्सम
स्तंजगत्तस्मैश्रीगुरुमूर्त्तयेनमइदंश्रीदक्षिणामूर्त्तये ५ देहंप्राणमथेंद्रि
याण्यपिचलांबुद्धिंचशून्यंविदुःस्त्रीबालांधजडोपमास्त्वहमितिभ्रांताभृशंवा
दिनः मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे तस्मैश्रीगुरुमूर्त
येनमइदंश्रीदक्षिणामूर्त्तये ६ राहुग्रस्तदिवाकरेंदुसदृशोमायासमाछा
दनात्सन्मात्रकरणोपसंहरणतोयोभूत्सुषुप्तःपुमान् प्रागस्वाप्समितिप्रबोध
समयेयःप्रत्यभिज्ञायते तस्मैश्रीगुरुमूर्त्तयेनमइदंश्रीदक्षिणामूर्त्तये ७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्यसंकीर्त्तनात् सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः सिध्येत्तत्पु
नरष्टधापरिणतं चैश्वर्यमव्याहतं ११ इति श्री दक्षिणामूर्तिशिवस्तोत्रं स
माप्तम् शुभमस्तु रामदयालेन लिखितं पंतीवा सोपानार्थम् रामः

3

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

4

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham